ष्टम वैक्लव्ये। इति कविकल्पद्रुमः ॥(भ्वा०-पर०-अक०-सेट्।) वैक्लव्यं विह्वलीभावः। स्तमति। अतिष्टमत्। इति दुर्गादासः॥

ष्टम,त् क वैक्लव्ये। इति कविकल्पद्रुमः ॥(अदन्त चुरा०-पर०-अक०-सेट्।) मूर्द्धन्यादिः। षोपदेशपाठो भ्वाद्यादीति दन्त्यत्वे कृतसकारादित्वात् षत्वार्थः। तिष्टमयिषति। एवं सर्वत्र। इति दुर्गादासः॥

ष्टिघ, न ङ आस्कन्दे। इति कविकल्पद्रुमः॥ (स्वा०-आत्म०-सक०-सेट्।) आस्कन्त् आस्कन्दनम्। अभियोग इति भट्टमल्लः। न ङ, स्तिघ्नुते नदीं पान्थः। तिष्टिघे। इति दुर्गादासः॥

ष्टिप,ऋ ङ क्षरति। इति कविकल्पद्रुमः॥(भ्वा०-आत्म०-अक०-सेट्।) ऋ, अतिष्टेपत्। ङ, स्तेपते तिष्टेपे। क्षरति क्षरणे। इति दुर्गादासः॥

ष्टिम, य क्लेदे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्।) य,स्तिम्यति तिष्टेम। क्लेदः आर्द्रभावः। इति दुर्गादासः॥

ष्टीम, य क्लेदे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्।) य,ष्टीम्यति तिष्टीम। क्लेद आर्द्रभावः। इति दुर्गादासः॥

ष्टु, ञ ल स्तुतौ। इति कविकल्पद्रुमः॥ अदा०-उभ०-सक०-अनिट्।) मूर्द्धन्यादिः। ञ ल, स्तौति स्तवीति स्तुते। इति दुर्गादासः॥

ष्टुच, ङ प्रसादे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) मूर्द्धन्यादिस्तमध्यः। प्रसादः प्रसन्नीभावः। ङ, स्तोचते जनं तोष्टुच्यते। षस्याधो मूर्द्धन्यण इति केचित्। स्तोचते मोस्तुच्यते। इति दुर्गादासः॥

ष्टुभ, उ ङ स्तम्भे। इति कविकल्पद्रुमः॥(भ्वा० आत्म०-अक०-सक० च-सेट्। क्त्वावेट्।) उ, स्तोभित्वा। स्तुब्ध्वा। ङ, स्तोभते तुष्टोभयिषति। स्तम्भो जड़ीभावः तत्करणञ्च। स्तम्भौ स्थूणाजड़ीभावावित्यमरोक्तेः। शीतेनावस्तब्धो जड़ीकृत इत्यर्थः। इति क्रमदीश्वरोक्तेश्च। "शास्त्रेण स्तोभते भूयो लघुप्रकृतिको नरः।" इति हलायुधः।

स्तोभते हषं शीतो वायुः। इति चतुर्भुजः। स्तम्भ इह क्रियानिरोधः। इति भीमः। दोषवृद्धिरिति गोविन्दभट्टः। इति दुर्गादासः।

ष्टूप,क उच्छ्राये। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) षष्ठस्वरी। उच्छ्रायो राशीकरणम्। क, स्तूपयति धान्यं कृषकः। तुष्टूपयिषति। इति दुर्गादासः॥

ष्टूप, य इर् उच्छ्राये। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) षष्ठस्वरी। य, स्तूप्यति। इर्,अस्तूपत् अस्तूपीत्। पुषादित्वाचित्यं ङ इत्यन्ये। अतुष्टूपत्। इति दुर्गादासः॥

ष्टृच,गमने। इति कविकल्पद्रुमः॥ (भ्वा०-पर० सक०-सेट्।)सप्तमस्वरयुक्तः तमध्यः। स्तृचति तरीष्टृच्यते। इति दुर्गादासः॥

ष्टृह, ऊ श वधे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-वेट्।) मूर्द्धन्यादिः तमध्यः। ऊ, अस्तर्हीत्। अस्तृक्षत्। श, स्तृहती स्तृहन्ती। तिष्टर्हयिषति। इति दुर्गादासः॥

ष्टृह, ऊ श वधे। इति कविकल्पद्रुमः॥ (तुदा० पर०-सक०-वेट्।) मूर्द्धन्यादिः तमध्यः। अष्टमस्वरी। ऊ,अस्तृहीत् अस्तृक्षत्। श स्तृहती स्तृहन्ती। तिष्टृहयिषति। इति दुर्गादासः॥

ष्टेप, ऋ ङ क्षरति इतिकविकल्पद्रुमः॥(भ्वा० आत्म०-अक०-सेट्।) ऋ, अतिष्टेपत्। ङ, स्तेपते तिष्टेपे। क्षरति चरणे। इति दुर्गादासः॥

ष्ण्यूमः, पुं, चन्द्रः। दीप्तिः। इति केचित्॥

ष्ट्यै, संहतौ। ध्वनौ। इतिकविकल्पद्रुमः॥(भ्वा० पर०-अक०-अनिट्।) अन्तःस्थाद्ययुक्तदन्त्यवर्गाद्यमध्यः षयोगात् टः। तेन तष्ट्यौ। तष्ट्यासति। ताष्ट्यायते। संहतिः समूहः। ष्ट्यायति लोकः एकत्र समूहायते शब्दायते वा इत्यर्थः॥ दन्त्यविधौ ष्ट्यै ष्वक्कष्ठिवां वर्ज्जनान्न दन्त्यः। इति दुर्गादासः॥

ष्ठग, म ए संवृतौ। इति कविकल्पद्रुमः॥ (भ्वा पर०-अक०-सेट्।)मूर्द्धन्यादिस्थमध्यः षयोगात् ठः। म, तिष्ठगयिषति। ए, अस्थगीत्। दन्त्यवर्गप्रथममध्यः इति केचित्। तिष्ठगयिषति अतिष्ठगत्। इति दुर्गादासः॥

ष्ठल, ज स्थितौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।)ज, स्थालः स्थलः। स्थलति लोकस्तिष्ठतीत्यर्थः। इति दुर्गादासः॥

ष्ठा, ञि स्थाने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-अनिट्।) ञि, स्थितोऽस्ति। स्थानं गतिनिवृत्तिः। तिष्ठति साधुधर्मे। पृष्ठतस्तिष्ठमान इति वीरचरिते प्रकाशार्थे आत्मनेपदविधानात् शानः। अथवा ताच्छील्ये शतुः शानः। इति दुर्गादासः॥

ष्ठिव, उ निरासे। इति कविकल्पद्रुमः॥ (भ्वा० पर०-सक०-सेट्। क्त्वावेट्।) उ, ष्ठेवित्वा ष्ठ्यूत्वा। अस्य नेम् डीश्वौ इत्यादिना इमो निषेधे निष्ठायां ष्ठ्यूत इति भेदः। निरास इह फुत्कार इति भट्टमल्लः। सुखेन श्लेष्मादेर्वमनमिति केचित्। इति दुर्गादासः॥

ष्ठिव, य निरासे। इति कविकल्पद्रुमः॥ (दिवा० पर०-सक०-सेट्।) य, ष्ठीव्यति। इति दुर्गादासः॥

ष्ठीव, निरासे। इति कविकल्पद्रुमः॥(भ्वा०पर०-सक०-सेट्।) ष्ठीवति। यं कृष्विनं मत्वा ष्ठिवुक्लमाचमोऽपीति दीर्घिणं विदधामः स एवायं ष्ठीविष्यति इत्यादिसाधनाय दीर्घी पठ्यते। तेन कृष्विनो ग्रहणेनास्मिन् गृहीते भ्वाद्यादि ष्णः स्न इत्यादिना मूर्द्धन्यषस्य दन्त्यसो न स्यात् एवं ष्ठिवजाद्योः खेरित्यादिना खेष्ठकारस्य तकारे तिष्ठीव टिष्ठीवइत्यपि स्यात्। यत्तु सत्यप्यस्मिन्ननटि ष्ठीवनमिति निपातनं तदस्य सर्वसम्मतत्वाभावात। निरास इह कृतकार इति भट्टमल्लः। सुखेन श्लेष्मादेर्वमनमिति केचित्। ष्ठीवत्यन्नं लोकः। ष्ठीवासि शुष्केक्षुलतास्थिकल्पम्। इति दुर्गादासः॥

ष्णस,य लृ उ मि निवासे। इति कविकल्पद्रुमः। (दिवा०-पर०-अक० सेट्। क्त्वावेट्।) मूर्द्धन्यादिर्दन्त्यनकारयुक्तः। य, स्नस्यति। लृ, अस्नसत्। उ, स्नसिता स्नस्त्वा। मि,स्नसयति स्नासयति। इति दुर्गादासः॥

ष्णा, ल शोधने। इति कविकल्पद्रुमः॥(अदा० पर०-अक०-अनिट्।) मूर्द्धन्यादिरयम्। दन्त्यादिरयमिति कश्चित्। ल, स्नाति गङ्गायां धीरः। अनुपसर्गस्य ञौ ज्वलह्वलेत्यादिना ह्रस्वो वा स्नपयति स्नापयति। सोपसर्गस्य तु प्रस्नापयति। इति दुर्गादासः॥

ष्णिह, ऊ य लृ ञि प्रीतौ। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-वेट्।) ऊ, स्नेहिष्यति स्नेक्ष्यति। य, स्निह्यति बन्धुः। लृ, अस्निहत्। ञि, स्निग्धः स्नीढोऽस्ति। इति दुर्गादासः॥

ष्णिह,क स्नेहने। इति कविकल्पद्रुमः॥ (चुरा० पर-अक०-सेट्।) स्नेहनं स्निग्धीभावः। क, स्नेहयति वर्त्तिका तैलेन। इति दुर्गादासः॥

ष्णु, ञ ल स्तुतौ। इति कविकल्पद्रुमः॥ (अदा० उभ०-सक०-अनिट्।) ञ ल,स्नौति स्नवीति स्नुते। इति दुर्गादासः॥

ष्णुच, ङ सेचने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्। स्नोचते सुष्णुचे। इति दुर्गादासः॥

ष्णुम, य भक्षे। इति कविकल्पद्रुमः॥ (दिवा० पर०-सक०-सेट्।) दन्त्यनकारयुक्तः। य, स्नुम्यति सुष्णोम। इति दुर्गादासः॥

ष्णुह, य ऊ लृ उद्गारे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-वेट्।) दन्त्यनकारयुक्तः। उद्गारो वान्तिः। य, स्नुह्यत्यन्नं लोकः। ऊ, स्नोहिष्यति स्नोक्ष्यति। लृ, अस्नुहत्। इति दुर्गादासः॥

ष्णै,वेष्टे। इति कविकल्पद्रुमः (भ्वा०-पर०-सक० अनिट्।)प्रकृत्या दन्त्यवर्गशेषोपधः। स्नायति वृक्षं लता। अनुपसर्गस्य ञौ ज्वलह्वलेत्यादिना ह्रस्वो वा स्नपयति स्नापयति। सोपसर्गस्य तु प्रस्नापयति। इति दुर्गादासः॥

ष्मि, ङ स्मिते। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-अनिट्। स्मितमीषद्धास्यम्। ङ, स्मयते बधूः। विस्मापयते। इति दुर्गादासः॥

ष्वक्क, ङ सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक-सेट्।) वकारयुक्तादिः कोपधः। ङ, ष्वक्कते पिष्वक्किषते पाष्वक्कते। दन्त्यविधावस्य वर्ज्जनान्न दन्त्यः। चन्द्रोदयस्तु इमं पञ्चमस्वरिणं मत्वा ष्वुक्कते षुष्वुक्किषते षोष्वुक्कते इत्याह॥ इति दुर्गादासः॥